Total No. of Questions : 10 Total No. of Printed Pages : 2

Code No : S-01

Samskrita Examination - 2012

साहित्यम् - SAHITYA

Group - I

Paper I - Padya Kavya (Poetry)

पद्यकाव्यम्

Date : 04.02.2012

Time : 9:00 AM - 12:00 PM Max. Marks :100

**I. एकवाक्येन उत्तरं लिखत (पञ्चानामेव)।** 5 X 1 = 05

१. "वलीमुखेश्वरः" इति कं कथयन्ति ?

२. "सर्वतन्त्रस्वतन्त्रः" इति उपाधिं कः प्राप्तवान् ?

३. "भारवेः" पूर्वतनं नाम किम् आसीत् ?

४. माघकविः कस्मिन् शास्त्रे पारङ्गतः आसीत् ?

५. यक्षः केन सह स्वकुशलवार्तां प्रेषयितुमिच्छति ?

६. "मुरद्विट्" कः?

**II. संयोज्य लिखत ।** 4 X 1 = 04

| अ | आ |
|---|---|
| १. अभिनन्दनः | वनपर्व । |
| २. वेङ्कटनाथः | इन्द्रप्रस्थः । |
| ३. किरातार्जुनीयम् | यादवाभ्युदयम् । |
| ४. धर्मराजः | वङ्गालदेशीयः । |

**III. षण्णां पदानाम् अर्थं लिखत ।** 6 X 1 = 06

| | |
|---|---|
| १. व्यालवधूः । | २. असून् । |
| ३. खरांशुः । | ४. काष्ठाः । |
| ५. आत्मयोनिः । | ६. व्यलीकम् । |
| ७. अलिनीलम् । | ८. आयत्तम् । |

**IV. (अ) व्याकरणविशेषं लिखत (त्रयाणामेव) ।** 3 X 2 = 06

१. आपृच्छस्व ।

२. गिरिम् अधिवसेः ।

३. प्रसेदिवांसम् ।

४. त्वत् विना ।

**(आ) विग्रहवाक्यं विलिख्य समासनाम लिखत (त्रयाणामेव) ।** 3 X 2 = 06

१. द्वैपायनः ।

२. दूरबन्धुः ।

३. किरातार्जुनौ ।

४. दिक्सरिताम् ।

**V. सलक्षणम् अलङ्कारविशेषं लिखत (एकस्य) ।** 1 X 3 = 03

१. बभूवतुर्भिन्नघनाघनोदरौ नभोनभस्याविव तौ समागतौ ।।

२. बिभ्राणमानीलरुचं पिशङ्गीः जटास्तडित्वन्तुमिवाम्बुवाहम् ।।

**VI. लघुटिप्पणीं लिखत (द्वयोः) ।** 2 X 3 = 06

१. भारविः ।

२. यक्षोहेममाली ।

३. शिशुपालः ।

**VII. लघूत्तराणि लिखत (पञ्चानामेव) ।** 5 X 4 = 20

१. दुःखितं लक्ष्मणं रामः कथं समाधत्ते ?

२. व्यासमहर्षेः वर्णनं कुरुत ।

३. कपिसैन्यागमनं वर्णयत ।

४. अग्रपूजार्हः श्रीकृष्णः एव इति भीष्मः कथं समर्थयति ?

५. उज्जयिनीवर्णनं कुरुत ।

६. अर्जुनं प्रति द्रौपद्याः उक्तयः काः ? लिखत ।

**VIII. ससन्दर्भं विवृणुत (पञ्चानामेव) ।** 5 X 4 = 20

१. पूज्य इत्ययमपीष्यते विधिः ।

२. वितानचित्राः ककुभः चकाशिरे ।

३. दुःखातिभारोऽपि लघुः स मेने ।

४. पुष्यन् बभौ पुण्यतमे मुहूर्तः ।

५. रिक्तः सर्वो भवति हि लघुः पूर्णता गौरवाय ।

६. यं विशन्ति वशिनं मुमुक्षवः ।

**IX. क्रियापदस्य रूपाणि लिखत (द्वयोः) ।** 2 X 4 = 8

१. दध्मि । २. स्तौति । ३. रुणद्धि ।

**X. सावतरणं व्याख्यात (द्वयोः) ।** 2 X 8 = 16

१. प्रत्यासन्ने नभसि दयिताजीवितालम्बनार्थी
जीमूतेन स्वकुशलमयीं हारयिष्यन् प्रवृत्तिम् ।
स प्रत्यग्रैः कुटजकुसुमैः कल्पितार्घाय तस्मै
प्रीतः प्रीतिप्रमुखवचनं स्वागतं व्याजहार ।।

२. अजस्स्वजन्मार्हतयानुमेने यामष्टमीं यादवभावमिच्छन् ।
द्वितीयया भावितयोगनिद्रा साभूत्तदा प्रथमा तिथीनाम् ।।

३. स गोमुखक्काणतरङ्गसंहतिः
चिरं निनादोऽनुननाद पाणवः ।
स्थलीपु निर्घृष्टबलासु पार्ष्णिभिः
चकाशिरे केऽपि न पादपाणवः ।।

* * * *